१०

अर्थापत्तिखण्डः अनुपलब्धिखण्डः च

प्रस्तावना

वेदान्तशास्त्रे षट् प्रमाणानि सन्ति। तानि च प्रत्यक्षम् अनुमानम् उपमानम् शब्दः अर्थापत्तिः अनुपलब्धिश्चेति। तेषु प्रत्यक्षप्रमाणविषये अनुमानविषये उपमानविषये शब्दप्रमाणविषये च पूर्वपाठेषु विस्तरेण पठितम्। अस्मिन् पाठे अर्थापत्तिप्रमाणविषये अनुपलब्धिप्रमाणविषये च आलोच्यते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- अर्थापत्तिप्रमां ज्ञास्यति।
- अर्थापत्तिप्रमाणं ज्ञास्यति।
- अर्थापत्तिभेदान् ज्ञास्यति।
- अनुपलब्धिप्रमाणम् अवगच्छेत्।
- अभावभेदान् ज्ञास्यति।
- प्रामाण्यवादस्य सामान्यपरिचयं प्राप्नुयात्।

१०.१) अर्थापत्तिप्रमाणम्

अर्थापत्तिप्रमाणम् इति शब्दस्य अर्थः भवति - अर्थापत्तिप्रमाकरणम् इति। तत्र कस्याः प्रमायाः करणम् इति चेत् अर्थापत्तिप्रमायाः एव करणमत्र ग्राह्यम्। कारणं हि अर्थापत्तिशब्दः प्रमावाचकः अपि अस्ति, प्रमाणवाचकः अपि अस्ति। यतोहि यदा अर्थस्य आपत्तिः इति अर्थापत्तिः इति षष्ठीसमासः स्वीक्रियते तदा अयं शब्दः प्रमावाचकः भवति। अत्र आपत्तिशब्दस्यार्थः कल्पनमिति। एवञ्च अस्य अर्थः भवति अर्थकल्पनम् इति। यदा च अर्थस्य आपत्तिः यस्मात् इति अर्थापत्तिः इति बहुव्रीहिसमासः स्वीक्रियते तदा अयं शब्दः प्रमाणवाचकः भवति। अस्य च अर्थः भवति अर्थकल्पनकरणम् इति। ततश्च अर्थापत्तिप्रमायाः यत् करणं तदेव अर्थापत्तिप्रमाणम्। एवञ्च अर्थापत्तिप्रमाकरणत्वम् अर्थापत्तिप्रमाणत्वम् इति लक्षणं फलितं भवति। ततश्च अर्थापत्तिप्रमाणस्य ज्ञानार्थम् अर्थापत्तिप्रमायाः ज्ञानमावश्यकं भवति। अतः पूर्वम् अर्थापत्तिप्रमायाः लक्षणं प्रतिपाद्यते।

१०.२) अर्थापत्तिप्रमा

उपपाद्यज्ञानेनोपपादककल्पनम् अर्थापत्तिः। अर्थात् उपपाद्यज्ञानेन उपपादकस्य कल्पना एव अर्थापत्तिः प्रमा। तत्र किं नाम उपपाद्यम्, किञ्च उपपादकमिति चेत् - येन विना यदनुपपन्नम्, तत् तत्रोपपाद्यम्। यस्याभावे यस्यानुपपत्तिः तत् तत्रोपपादकम्। यथा पीनोऽयं देवदत्तः दिवा न भुङ्क्ते इत्यादौ दिवाऽभुञ्जाननिष्ठपीनत्वम् उपपाद्यम् अस्ति। (पीनः स्थूलः इति।) रात्रिभोजनञ्च उपपादकम् अस्ति। तत्र उपपाद्यस्य लक्षणे येन इति पदेन उपपादकस्य ग्रहणं कर्तव्यम्। यथा प्रकृते येन रात्रिभोजनेन विना यद् दिवाऽभुञ्जाननिष्ठपीनत्वम् अनुपपन्नम् अतः तत् दिवाऽभुञ्जाननिष्ठपीनत्वम् उपपाद्यम्। उपपादकलक्षणे प्रथमेन यस्य इति पदेन उपपादकस्य ग्रहणं कर्तव्यम्। यथा यस्य रात्रिभोजनस्य अभावे यस्य दिवाऽभुञ्जाननिष्ठपीनत्वस्य अनुपपत्तिः, अतः तत् रात्रिभोजनम् उपपादकम्।

अयमाशयः

दिवाभोजनाभाववतः यदि रात्रिभोजनं न स्यात्, तदा तस्य पीनत्वं न स्यात्। दृश्यते च पीनत्वम्। अतस्तस्य पीनत्वस्य उपपत्तये (समर्थना) रात्रिभोजनं कल्पनीयम्। तेन कल्पनीयरात्रिभोजनेन पीनत्वस्योपपत्तौ रात्रिभोजनाभावे च पीनत्वस्यानुपपत्तौ पीनत्वम् उपपाद्यम्, रात्रिभोजनञ्च उपपादकम्। एवञ्च उपपाद्यज्ञानं करणं भवति। अर्थात् अर्थापत्तिप्रमाणं भवति। उपपादकज्ञानं फलं भवति। अर्थात् उपपदकज्ञानं प्रमा भवति। ततश्च पीनोऽयं देवदत्तः दिवा न भुङ्क्ते इत्यादौ दिवाऽभुञ्जाननिष्ठपीनत्वज्ञानेन रात्रिभोजनं कल्प्यते, अतः प्रकृते दिवाऽभुञ्जाननिष्ठपीनत्वज्ञानम् अर्थापत्तिप्रमाणम्। रात्रिभोजनज्ञानं च अर्थापत्तिप्रमा इति फलितम्।

१०.२.१) उपपाद्यत्वलक्षणम् -

येन विना यदनुपपन्नम्, तत् तत्रोपपाद्यम् इति उपपाद्यस्य स्वरूपं प्रतिपादितम्। तस्यैव परिष्कृतं लक्षणं विद्यते - **तदभावव्यापकीभूताभावप्रतियोगित्वम् उपपाद्यत्वम्।** तस्य अभावः इति तदभावः। तदभावस्य व्यापकः अभावः इति तदभावव्यापकीभूताभावः। तदभावव्यापकीभूताभावस्य प्रतियोगी इति तदभावव्यापकीभूताभावप्रतियोगी। तस्य भावः इति तदभावव्यापकीभूताभावप्रतियोगित्वम्। अत्र तत्पदेन उपपादकत्वेन अभिमतस्य वस्तुनः परामर्शः। एवञ्च पीनः देवदत्तः दिवा न भुङ्क्ते इत्यादौ तत्पदेन उपपादकस्य रात्रिभोजनस्य ग्रहणम्। तस्य अभावः रात्रिभोजनाभावः। तस्य व्यापकीभूताभावः दिवाऽभुञ्जानत्वनिष्ठपीनत्वाभावः। यतोहि यत्र यत्र रात्रिभोजनाभावः - तत्र तत्र दिवाऽभुञ्जाननिष्ठपीनत्वाभावः इति प्रतीत्या रात्रिभोजनाभावस्य व्यापकीभूताभावः दिवाऽभुञ्जाननिष्ठपीनत्वाभावः। अत्र च दिवाऽभुञ्जाने रात्रिभोजनाभाववति पुरुषसामान्ये दिवाऽभुञ्जानत्वसमानाधिकरणपीनत्वाभावदर्शनमेव प्रमाणम्। ततश्च रात्रिभोजनाभावव्यापकीभूताभावः दिवाऽभुञ्जाननिष्ठपीनत्वाभावः, तस्य प्रतियोगि दिवाऽभुञ्जाननिष्ठपीनत्वम्, अतः प्रकृते दिवाऽभुञ्जाननिष्ठपीनत्वम् उपपाद्यम्।

१०.२.२) उपपादकत्वलक्षणम् -

यस्याभावे यस्यानुपपत्तिः तत् तत्रोपपादकम् इति उपपादकस्य स्वरूपं प्रतिपादितम्। तस्यैव परिष्कृतं स्वरूपं अस्ति - **उपपाद्याभावव्याप्यभूताभावप्रतियोगित्वम् उपपादकत्वम्**। यथा पीनः देवदत्तः दिवा न भुङ्क्ते इत्यादौ उपपाद्यं दिवाऽभुञ्जाननिष्ठपीनत्वम्, तस्य अभावः दिवाऽभुञ्जाननिष्ठपीनत्वाभावः, तस्य व्याप्यभूतः अभावः रात्रिभोजनाभावः, यत्र यत्र रात्रिभोजनाभावः तत्र तत्र दिवाऽभुञ्जाननिष्ठपीनत्वाभावः इति प्रतीत्या रात्रिभोजनाभावस्य व्याप्यत्वात्। तस्य प्रतियोगि रात्रिभोजनम्। अतः रात्रिभोजनम् उपपादकम्।

१०.२.३) अर्थापत्तिभेदः –

अर्थापत्तिः द्विविधा भवति। दृष्टार्थापत्तिः श्रुतार्थापत्तिः च।

दृष्टार्थापत्तिः -

दृष्टेन शब्देतरप्रमाणप्रमितेन अर्थेन अदृष्टस्य अर्थस्य कल्पना दृष्टार्थापत्तिः इति प्रोच्यते। तथाहि - कश्चित् जनः कदाचित् समुद्रतटं गतवान्, तत्र च दूरात् समुद्रतटे पतितां शुक्तिम् दृष्टवान्। परन्तु दृष्टिदोषवशात् सः सम्यग् रूपेण न ज्ञातवान् यत् इयं शुक्तिः इति। किन्तु सः चिन्तितवान् इदं रजतम् इति। एवञ्च दोषवशात् तस्य शुक्तौ इदं रजतम् इति ज्ञानं जातम्। ततः परं यदा सः समीपं गत्वा दृष्टवान् तदा तस्य भ्रमस्य निराकरणं जातं यत् इदं रजतं नास्ति, अपितु शुक्तिः अस्ति। एवञ्च शुक्तिकादौ प्रतीयमानं रजतं यदि सत्यं स्यात् तर्हि कथं परक्षणे एव नेदं रजतमिति निषेधबुद्धिः स्यात् जनस्य। परन्तु भवति तस्य निषेधबुद्धिः। अतः शुक्तिकादौ प्रतीयमानं रजतं न सत्यम् अपितु मिथ्यैवेति इति सः जनः निश्चिनोति। अतः अत्र दृष्टेन अर्थेन अदृष्टस्य मिथ्यात्वरूपस्य अर्थस्य कल्पनां करोति जनः। अतः अत्र दृष्टार्थापत्तिः। नेदं रजतम् इति निषिध्यमानत्वज्ञानं प्रमाणभूता अर्थापत्तिः। प्रतीयमानं रजतं मिथ्या इति निश्चयः फलभूता अर्थात् प्रमाभूता अर्थापत्तिः। एवमन्यत्रापि बोध्यम्।

यथा शुक्तौ नेदं रजतम् इत्यादौ नेदं रजतम् इति उपपाद्यम् अस्ति। मिथ्यात्वम् च उपपादकम् अस्ति। तत्र उपपाद्यस्य लक्षणे येन इति पदेन उपपादकस्य ग्रहणं कर्तव्यम्। यथा प्रकृते येन मिथ्यात्वेन विना यद् नेदं रजतम् इति अनुपपन्नम्। अतः तत् नेदं रजतम् उपपाद्यम्। उपपादकलक्षणे प्रथमेन यस्य इति पदेन उपपादकस्य ग्रहणं कर्तव्यम्। यथा यस्य मिथ्यात्वस्य अभावे यस्य नेदं रजतम् इत्यस्य अनुपपत्तिः, अतः तत् मिथ्यात्वम् उपपादकम्।

श्रुतार्थापत्तिः -

श्रुतेन अर्थेन आपत्तिः कल्पना क्रियते तत्र श्रुतार्थापत्तिः इति व्यवहारः भवति॥ यथा तरति शोकमात्मवित् इति श्रुतिः। आत्मवित् आत्मज्ञानवान् शोकं तरति बन्धरहितो भवति इत्यर्थः श्रुतिवाक्यस्य। एवञ्च अनया श्रुत्या आत्मज्ञानं बन्धविगमहेतुः इति प्रतिपाद्यते। किन्तु शाब्दी प्रतीतिरियं तदैव उपपन्ना भवति यदि शोकशब्दवाच्यस्य बन्धस्य मिथ्यात्वं स्यात् नान्यथा। कारणं न हि वास्तविकस्य (तात्त्विकस्य, सत्यस्य) अर्थस्य येन केनचित् ज्ञानेन नाशः भवितुं नार्हति। परन्तु

श्रुतिवाक्यं तु प्रमाणमेव। अतः श्रुतिवाक्यप्रामाण्येन कल्प्यते यत् न बन्धः सत्यः अपि तु मिथ्या एवेति। अत्र तरति शोकमात्मवित् इति वाक्यार्थबोधानुपपत्त्या बन्धमिथ्यात्वं कल्पितं भवति। एवञ्च बन्धमिथ्यात्वम् उपपादकम्, शाब्दी प्रतीतिः च उपपाद्या। ततश्च प्रकृते बन्धमिथ्यात्वं विना शाब्दी प्रतीतिः अनुपपन्ना। अतः तत् बन्धमिथ्यात्वम् उपपादकम्। यस्य बन्धमिथ्यात्वाभावे यस्य शाब्दज्ञानस्य अनुपपत्तिः, अतः तत् शाब्दज्ञानम् उपपाद्यम्। एवञ्चात्र उपपादकत्वात् बन्धमिथ्यात्वं फलं नाम प्रमा। उपपाद्यत्वात् च शाब्दी प्रतीतिः करणं नाम प्रमाणमिति भावः। एवमेव श्रुतार्थापत्तेः अपरम् उदाहरणं भवति - जीवी देवदत्तः गृहे न इति। अयम्भावः जीवन् जनः गृहे तिष्ठति बहिर्वा। तृतीया गतिः अत्र नास्ति। तत्र जीवी देवदत्तः गृहे नास्ति इति श्रवणे जीविनो गृहासत्त्वं बहिःसत्त्वं विनानुपपन्नम्। देवदत्तः बहिःसत्त्ववान् इति निश्चयो भवति। अतः नात्र काचन विप्रतिपत्तिः। ततश्च येन विना बहिःसत्त्वेन विना जीविनः गृहासत्त्वम् अनुपपन्नम् अतः तत् बहिःसत्त्वम् अत्र उपपादकम्। यस्य अभावे बहिःसत्त्वाभावे यस्य अनुपपत्तिः जीविनः गृहासत्त्वस्य अनुपपत्तिः। अतः तत् जीविनः गृहासत्त्वम् अत्र उपपाद्यम्। एवञ्च उपपाद्यज्ञानेन जीविनः गृहासत्त्वज्ञानेन उपपादकस्य बहिःसत्त्वस्य कल्पनं क्रियते। अतः अत्र जीविनः गृहासत्त्वज्ञानं करणम् नाम अर्थापत्तिप्रमाणम्। बहिःसत्त्वज्ञानम्, फलं नाम अर्थापत्तिप्रमा।

श्रुतार्थापत्तिभेदः -

श्रुतार्थापत्तिरपि द्विविधा वर्तते। अभिधानानुपपत्तिः अभिहितानुपपत्तिश्चेति। कारणं हि शाब्दबोधानुपपत्तिस्थले श्रुतार्थापत्तिः भवतीति प्रतिपादितम्। तत्र शाब्दबोधानुपपत्तेरपि मूलं द्विविधं भवति - शब्दानुपपत्तिः अर्थानुपपत्तिश्च। अतः तद्भेदात् श्रुतार्थापत्तेरपि द्वैविध्यमावश्यकमिति।

अभिधानानुपपत्तिः -

यत्र वाक्यैकदेशश्रवणेऽन्वयानुपपत्त्याऽन्वयाभिधानोपयोगि पदान्तरं कल्प्यते तत्र अभिधानानुपपत्तिः इति। अभिधानानुपपत्तेः अपरं नाम तात्पर्यानुपपत्तिः इत्यपि अस्ति। यथा केनचित् जनेन 'द्वारम् पिधेहि' इति वाक्यस्य स्थाने द्वारम् इति वाक्यैकदेशस्य प्रयोगः कृतः। परन्तु वक्ता बोधयितुम् इच्छति यद् द्वारम् पिधेहि इति। अर्थात् वक्तुः द्वारकर्मकपिधाने तात्पर्यमस्ति। एतत् श्रोता प्रकरणादिना अवगच्छति। परन्तु वक्त्रा प्रयुक्ते वाक्ये पिधेहि इति पदं नास्ति। तेन द्वारकर्मकपिधानम् इत्यर्थः भवितुं नार्हति। अतः वक्तुः तात्पर्यम् अनुपपन्नम्। अतः तात्पर्योपपत्तये पिधेहि इति पदस्य अध्याहारः श्रोत्रा क्रियते। तेन च द्वारकर्मकपिधानम् इति अर्थः प्रकृतवाक्यस्य भवति। तेन च तात्पर्यानुपपत्तेः परिहारः भवति। अत्र द्वारकर्मपिधानम् इति तात्पर्यम् पिधेहि इति पिधानोपस्थापकपदं विनानुपन्नम् सत् अश्रुतं पिधेहि इति पदान्तरं कल्पयति। द्वारकर्मकपिधानम् इति तात्पर्यम् उपपाद्यम्। तस्य ज्ञानं च अर्थापत्तिप्रमाणम्। पिधेहि इति पदस्याध्याहारः उपापादकः। अतः पिधेहि इति पदस्य ज्ञानम् अर्थापत्तिप्रमा।

अभिहितानुपपत्तिः -

यत्र वाक्यावगतोऽर्थोऽनुपपन्नत्वेन ज्ञातः सन्नर्थान्तरं कल्पयति तत्र अभिहितानुपपत्तिः द्रष्टव्या। यथा स्वर्गकामः ज्योतिष्टोमेन यजेत इति श्रुतिवचनम्। अस्यार्थः - स्वर्गकामः पुरुषः ज्योतिष्टोमयागं

कुर्यात् इति। अतः अनेन अर्थेन ज्योतिष्टोमस्य स्वर्गसाधनत्वम् अवगम्यते। ज्योतिष्टोमयागस्य समाप्तेः बहुकालानन्तरं यजमानस्य स्वर्गलाभः भवति। अतः स्वर्गलाभं प्रति ज्योतिष्टोमयागः साक्षात् कारणं भवितुम् नार्हति। कथं तर्हि ज्योतिष्टोमः स्वर्गसाधनम्। अतः ज्योतिष्टोमः स्वर्गसाधनम् इति वाक्यार्थस्यानुपपत्तिः भवति। अतः अनुपपन्नः सन् अपूर्वरूपम् अर्थान्तरं कल्पयति। तेन च स्वर्गप्राप्तिः भवतीति फलितम्। अर्थात् ज्योतिष्टोमः अपूर्वं जनयति। तच्च अपूर्वम् अन्तःकरणे विद्यमानः पुण्याख्यः गुणविशेषः। तच्च पुण्यं स्वर्गलाभं यावत् तिष्ठति।

प्रकृते च ज्योतिष्टोमः स्वर्गसाधनम् इति वाक्यार्थः उपपाद्यः अस्ति। अपूर्वम् उपपादकम् अस्ति। अतः ज्योतिष्टोमः स्वर्गसाधनम् इति वाक्यार्थज्ञानं करणम्। अतः अर्थापत्तिप्रमाणम्। अपूर्वज्ञानं च फलम्। अतः अर्थापत्तिप्रमा।

अत्रायं विशेषः-

अथ नैयायिकमते चत्वारि प्रमाणानि सन्ति। प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः चेति। तैः अर्थापत्तिप्रमाणं नैव स्वीक्रियते। ते वदन्ति यद् अर्थापत्तिप्रमाणस्य अनुमाने एव अन्तर्भावः भवति। तेषां मते अर्थापत्तिप्रमाणस्य केवलान्वयिनि अन्तर्भावः भवति। किन्तु वेदान्तसिद्धान्ते केवलान्वयिपदार्थः एव न स्वीक्रियते। अतस्तत्र अन्तर्भावः नैव भवितुमर्हति इति भावः।

पाठगतप्रश्नाः - १

१. अर्थापत्तिपदस्य द्वौ अर्थौ कौ।

२. अर्थापत्तिप्रमायाः लक्षणं किम्।

३. अर्थापत्तिप्रमाणस्य लक्षणं किम्।

४. पीनोऽयं देवदत्तः दिवा न भुङ्क्ते इत्युदाहरणे उपपादकं किम् उपपाद्यं च किम्।

५. उपपाद्यस्य लक्षणं लिखत।

६. उपपादकस्य लक्षणं लिखत।

७. अर्थापत्तेः कति भेदाः भवन्ति।

८. श्रुतार्थापत्तेः कति के च भेदाः भवन्ति।

९. श्रुतार्थापत्तेरुदाहरणं किम्।

१०.३) अनुपलब्धिः

षट्सु प्रमाणेषु अन्यतमं प्रमाणम् अनुपलब्धिप्रमाणम्। अनुपलब्धिशब्दे नञ्तत्पुरुषसमासः अस्ति। तस्य च विग्रहः भवति - न उपलब्धिः इति अनुपलब्धिः। तेन च अस्यार्थः भवति

उपलब्ध्यभावः। उपलब्ध्यभावप्रमाणेन च अभावविषयकज्ञानं जायते। तस्य च लक्षणम् अस्ति - **ज्ञानकरणाजन्याभावानुभवासाधारणकारणम्** अनुपलब्धिरूपं प्रमाणम्। ज्ञानरूपं यत् करणं तदजन्यो योऽभावानुभवः तस्यासाधारणं कारणम् इति विग्रहः। अर्थात् ज्ञानरूपकरणेन यन्न जायते तद् ज्ञानकरणाजन्यम्। ज्ञानकरणाजन्यम् यत् अभावविषयकज्ञानं तस्य यद् असाधारणं कारणम् हि अनुपलब्धिप्रमाणम्। अस्यार्थः - ज्ञानरूपं यत् करणं तदजन्यो योऽभावानुभवः नाम अभावज्ञानं, तस्य यद् असाधारणं कारणं तदनुपलब्धिरूपं प्रमाणं बोध्यम्। एवञ्च ज्ञानकरणाजन्याभावानुभवासाधारणकारणत्वम् इति अनुपलब्धिप्रमाणस्य लक्षणं फलति। अत्रायं भावः - तत्र अनुमितिप्रमायाः करणं भवति व्याप्तिज्ञानम्, उपमितिप्रमायाः करणं भवति सादृश्यज्ञानम्, शाब्दप्रमायाः करणं भवति पदज्ञानम् इति। तत्र एतैः ज्ञानरूपकरणैः अजन्यः यः अभावविषयकानुभवः, तस्य असाधारणकारणम् एव अनुपलब्धिप्रमाणमिति भावः। यथा भूतले घटाभावः विद्यते, तस्य ज्ञानं घटस्य अनुपलब्ध्या एव भवति। एवञ्च घटस्य अनुपलब्ध्या घटाभावस्य ज्ञानं भवति। एवमेव पटाभावस्य ज्ञानं पटस्य अनुपलब्ध्या भवति। एवमेव अन्यत्रापि। तस्मात् घटादिवस्तुज्ञानाभावेन घटादिवस्त्वभावः ज्ञायते। एवञ्च तत्तद्वस्तुज्ञानाभावः करणम्, तत्तद्वस्त्वभावज्ञानं फलमिति सिध्यति। एवञ्च घटादिवस्तुज्ञानाभावः करणं भवति। अर्थात् अनुपलब्धिप्रमाणं भवति। घटादिवस्त्वभावज्ञानं फलं भवति। अर्थात् प्रमा भवति।

अत्रायं विशेषः -

अथ यदि अभावविषयकज्ञानं प्रति अनुपलब्धिः करणमिति स्वीक्रियते तर्हि यथा जाग्रदवस्थायां घटाभावादेः ज्ञानम् अनुपलब्धिद्वारा भवति तथैव शयनकाले अपि घटाभावादेः ज्ञानम् स्यात्, तदानीमपि घटादीनाम् अनुपलब्धिसत्त्वात्, परन्तु शयनकाले तु अभावविषयकज्ञानं न भवति। अपि च धर्माभावविषयकज्ञानम्, अधर्माभावविषयकज्ञानम् अपि अनुपलब्धिद्वारा स्यात्, किन्तु वेदान्तिभिः धर्माभावविषयकज्ञानम् अधर्माभावविषयकज्ञानं तु अनुमानप्रमाणेन भवति इति प्रतिपाद्यते न तु अनुपलब्धिद्वारा। अतः प्रश्नः भवति यत् यदि अनुपलब्धिप्रमाणम् अस्ति तर्हि शयनकाले ज्ञानं कुतः न भवति। अपि च धर्माभावविषयकज्ञानम् अधर्माभावविषयकज्ञानं च अनुपलब्धिद्वारा कुतः न भवति इति। अत्र वदन्ति वेदान्तिनः यत् न हि अनुपलब्धिमात्रेण अभावज्ञानं जायते। अपितु योग्यानुपलब्धिद्वारा अभावविषयकज्ञानम् उत्पद्यते। अतः योग्यानुपलब्धिः विद्यते चेत् अभावविषयकज्ञानं भवति, योग्यानुपलब्धिः नास्ति चेत् अभावविषयकज्ञानं न भवति। एवञ्च अभावविषयकज्ञानं प्रति योग्यानुपलब्धिः कारणम् इति सिद्धम्।

ननु का नाम योग्यानुपलब्धिः इति चेद् अत्रोच्यते - **तर्कित-प्रतियोगिसत्त्व-प्रसञ्जित-प्रतियोगिकत्वं अनुपलब्धेः योग्यत्वम्**। तर्कितेन (आपादितेन) प्रतियोगिसत्त्वेन प्रसञ्जितो प्रतियोगी यस्य अनुपलम्भस्य सः तर्कित-प्रतियोगिसत्त्व-प्रसञ्जित-प्रतियोगिकः, तस्य भावः तर्कित-प्रतियोगिसत्त्व-प्रसञ्जित-प्रतियोगिकत्वम्। अर्थात् यस्य अभावः गृह्यते तस्य यः प्रतियोगी, तस्य सत्त्वेन अधिकरणे तर्कितेन प्रसञ्जितम् अपादनयोग्यं प्रतियोगि उपलब्धिस्वरूपं यस्य अनुपलम्भस्य सः तर्कित-प्रतियोगिसत्त्व-प्रसञ्जित-प्रतियोगिकः। तस्य भावः तर्कित-प्रतियोगिसत्त्व-प्रसञ्जित-प्रतियोगिकत्वम्।

अयम्भावः - प्रकाशयुक्तभूतले घटः यदि नास्ति तर्हि तत्र घटाभावः विद्यते। एवञ्च तत्र विद्यमानस्य घटाभावस्य ज्ञानम् घटस्य अनुपलब्धिद्वारा भवति। कारणं हि अत्र या अनुपलब्धिः सा योग्यानुपलब्धिः। यतो हि प्रकृते घटस्य अभावः गृह्यते। अतः तस्य प्रतियोगी घटः। तस्य सत्त्वेन अधिकरणे प्रसञ्जितम् अपादानयोग्यं प्रतियोगि उपलब्धिस्वरूपं विद्यते। कारणं प्रकृते वक्तुं शक्यते यदि अत्र घटः स्यात् तर्हि उपलभ्येत। अत्र या अनुपलब्धिः सा योग्यानुपलब्धिः। तया च घटाभावविषयकं ज्ञानं भवति। अयम्भावः - यस्मिन् अधिकरणे इदं वक्तुं शक्यते यदि अत्र घटः स्यात् तर्हि तस्य उपलब्धिः स्यात्। परन्तु नास्ति। अतः तस्य अनुपलब्धिः विद्यते इति तस्मिन् अधिकरणे या अनुपलब्धिः सा योग्यानुपलब्धिः। यथा प्रकाशयुक्तभूतले घटाभावदशायाम् इदं वक्तुं शक्यते यत् यदि अत्र घटः स्यात् तर्हि तस्य उपलब्धिः स्यात्। नास्ति। अतः तस्य अनुपलब्धिः विद्यते। तस्मात् प्रकाशयुक्तभूतले घटस्य या अनुपलब्धिः सा योग्यानुपलब्धिः। अतः तया घटाभावस्य ज्ञानं भवति। अन्धकारयुक्तभूतले तु घटाभावसत्त्वदशायामपि इदं नैव वक्तुं शक्यते यत् यदि अत्र घटः स्यात् तर्हि तस्य उपलब्धिः स्यात्। अतः अन्धकारयुक्तभूतले घटस्य या अनुपलब्धिः सा योग्यानुपलब्धिः नास्ति। तस्मात् तया घटाभावस्य ज्ञानं नैव भवति। एवमेव शयनकाले घटाभावसत्त्वदशायामपि इदं नैव वक्तुं शक्यते यत् यदि अत्र घटः स्यात् तर्हि तस्य उपलब्धिः स्यात्। अतः शयनकाले घटस्य या अनुपलब्धिः सा योग्यानुपलब्धिः नास्ति। तस्मात् तया घटाभावस्य ज्ञानं नैव भवति। एवमेव धर्मस्य अधर्मस्य च असत्त्वदशायाम् इदं वक्तुं नैव शक्यते यत् अत्र धर्मः स्यात्, अधर्मः वा स्यात् तर्हि तस्य उपलब्धिः स्यात्, नास्ति। अतः तस्य अनुपलब्धिः विद्यते इति। तस्मात् धर्मस्य अधर्मस्य च या अनुपलब्धिः सा योग्यानुपलब्धिः नास्ति, अपितु अयोग्यानुपलब्धिः विद्यते।

१०.३.१) अभावभेदः -

अनुपलब्धिप्रमाणेन अभावविषयकं ज्ञानं जायते इति प्रतिपादितम्। तादृशाभावविषयकज्ञानस्य विषयः अभावः च वेदान्तमते चतुर्विधः अस्ति। तथाहि प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावः च।

प्रागभावः -

भविष्यतीति प्रतीतिविषयः अभावः प्रागभावः। यथा इह मृत्पिण्डे घटः भविष्यति इति मृत्पिण्डादौ कारणे विद्यमानस्य कार्यस्य अभावः एव प्रागभावः इत्युच्यते। एवमेव तन्तौ पटः भविष्यति इति प्रतीतिविषयः अभावः तन्तौ पटस्य प्रागभावः। एवञ्च कार्यस्य उत्पत्तेः पूर्वं कारणे विद्यमानः कार्यस्य यः अभावः स एव प्रागभावः इत्युच्यते। अयञ्च अभावः अनादिः सान्तः अस्ति।

प्रध्वंसाभावः -

प्रध्वंसाभावस्य अपरं नाम ध्वंसाभावः इत्यस्ति। जन्यविनाश्यभावत्वम् इति च ध्वंसाभावस्य लक्षणम्। अर्थात् जन्यः विनाशी च यः अभावः सः एव ध्वंसाभावः इत्युच्यते। यथा मृत्पिण्डादौ मुद्गरपातानन्तरं घटस्य नाशे सति घटस्य प्रध्वंसाभावः उत्पद्यते, अपि च कपालस्य नाशे च अस्य

अभावस्यापि नाशः भवति। तस्मात् अयं भावः जन्यः अपि अस्ति विनाशी चापि अस्ति। तस्मात् अयं यः अभावः स प्रध्वंसाभावः इति। अयञ्च अभावः घटः नष्टः इति प्रतीतिविषयः।

अत्यन्ताभावः -

चतुर्विधेषु अभावेषु अन्यतमः अभावः अत्यन्ताभावः। यद्वस्तु यत्र न कदापि भविष्यति, न च कदाचित् भूतम्, न च अस्ति, तस्य वस्तुनः तत्र अत्यन्ताभावः बोध्यः। अर्थात् यत्राधिकरणे यस्य कालत्रयेऽप्यभावः सः अत्यन्ताभावः। यथा वायौ रूपं नास्ति इति प्रतीतिसाक्षिकः अभावः वायौ रूपात्यन्ताभावः। भूतले घटः नास्ति इति प्रतीतिसाक्षिकः भूतले घटाभावः। एवमन्यत्रापि बोध्यम्। एवञ्च त्रैकालिकाभावत्वम् इति अत्यन्ताभावस्य लक्षणं वक्तुं शक्यते।

अन्योन्याभावः -

अन्यस्य अन्यस्मिन् यः अभावः सः अन्योन्याभावः। अर्थात् इदमिदं नेति प्रतीतिविषयः यः अभावः सः अन्योन्याभावः। घटः न पटः इति प्रतीतिसिद्धः यः घटस्य अभावः, सः घटस्य अन्योन्याभावः। अयम् अन्योन्याभावः सादिः अपि अस्ति, अनादिः अपि अस्ति। एवञ्च यत्र अन्योन्याभावस्य अधिकरणं सादिः भवति तत्र अन्योन्याभावः अपि सादिः भवति। यथा घटः न पटः इत्यत्र पटरूपाधिकरणम् सादि अस्ति। अतः अत्र यः अन्योन्याभावः सः सादिः अस्ति। यत्र अन्योन्याभावस्य अधिकरणम् अनादि भवति तत्र अन्योन्याभावः अपि अनादिः भवति। यथा ब्रह्म न जीवः इत्यत्र अन्योन्याभावस्य जीवरूपाधिकरणम् अनादि अस्ति, अतः अत्र यः अभावः सः अनादिः अस्ति। अयम् अभावः भेदः विभागः पृथक्त्वं च इत्यपि प्रोच्यते। एवञ्च यथा इदम् इदं नेति प्रतीतिविषयः यः अभावः सः अन्योन्याभावः, तथैव इदम् अस्मात् विभक्तम्, इदम् अस्मात् अन्यत्, इदम् अस्मात् पृथग् इत्यादिप्रतीतिविषयः अभावः अपि अन्योन्याभावः इत्युच्यते।

अन्योन्याभावभेदः -

अन्योन्याभावः द्विविधः भवति। सोपाधिकः निरूपाधिकश्चेति।

सोपाधिकः -

तत्र उपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वम्। उपाधिसत्ताव्याप्या सत्ता यस्य भेदस्य सः भेदः उपाधिसत्ताव्याप्यसत्ताकः, तस्य भावः उपाधिसत्ताव्याप्यसत्ताकत्वम् इति। यथा घटाकाशः न मठाकाशः इति भेदः सोपाधिकः। उपाधिसत्ताव्याप्यसत्ताकत्वात्। यत्र यत्र आकाशादिभेदसत्ता तत्र तत्र घटाद्युपाधिसत्ता इति भेदसत्ता घटाद्युपाधिसत्ताव्याप्या, घटाद्युपाधिसत्ता तु व्यापिका। तथाहि यद्यपि आकाशः एकः एव विद्यते। किन्तु घटाद्युपाधिभेदात् आकाशः अपि भिद्यते। अतः अत्रेदं वक्तुं शक्यते यद् उपाधिभेदात् यत्र भेदः भवति तत्र यः अन्योन्याभावः सः सोपाधिकः इति। एवमेव एकस्यैव ब्रह्मणः अन्तःकरणभेदात् यः भेदः स अपि सोपाधिकः। यतोहि नहि ब्रह्मणि भेदः विद्यते किन्तु तदुपाधेः अन्तःकरणस्य भेदेन ब्रह्मणि भेदः प्रतीयते। अतः यावदन्तःकरणं तावदेवास्य भेदस्य स्थितिः।

निरुपाधिकः -

उपाधिसत्ताव्याप्यसत्ताकत्वात्यन्ताभाववत्त्वं निरुपाधिकत्वम्। उपाधिसत्ताव्याप्या सत्ता यस्य भेदस्य सः भेदः उपाधिसत्ताव्याप्यसत्ताकः। तस्य भावः उपाधिसत्ताव्याप्यसत्ताकत्वम्। तस्य अत्यन्ताभावः इति उपाधिसत्ताव्याप्यसत्ताकत्वात्यन्ताभावः, तद्वत्त्वम् उपाधिसत्ताव्याप्यसत्ता-कत्वात्यन्ताभाववत्त्वम्। अर्थात् उपाधिसत्ताव्याप्यसत्ताकत्वस्य भेदस्य अभावः विद्यते तत्र यः भेदः सः निरुपाधिकः भेदः। यथा घटो न पटः इति भेदः निरुपाधिकः। यतोहि अत्र काचिदपि उपाधिः नास्ति। अतः अत्र भेदे उपाधिसत्ताव्याप्यसत्ताकत्वं नास्ति, किन्तु उपाधि-सत्ताव्याप्य-सत्ताकत्वात्यन्ताभाववत्त्वं विद्यते। अतः घटपटयोः यः भेदः सः निरुपाधिकः भेदः। अर्थात् यत्र स्वाभाविकः एव भेदः भवति तत्र निरुपाधिकभेदः इत्युच्यते। एवमेव घटः न मठः इत्यादिभेदः अपि निरुपाधिकः अस्ति। एवमन्यत्रापि बोध्यम्।

१०.४) प्रामाण्यवादः

प्रमाणविषयपाठेषु प्रमाणं प्रमा चेति मुख्यविषयः। तत्र प्रमायां विद्यमानं प्रमात्वं कथं ज्ञायते इति अपि जिज्ञासा सुतरामुदेति। अत एव प्रामाण्यवादोऽपि प्रमाणविषयान्तर्गतः एव।

तत्र प्रामाण्यम् अप्रामाण्यं च स्वतः गृह्यते परतः वा गृह्यते इति विषये शास्त्रज्ञेषु मतभेदाः सन्ति। अत्र केवलं परिचयार्थम् अयं विषयः प्रस्तूयते। तत्र विषये एकं पद्यं प्रसिद्धमस्ति। यत्र सारांशरूपेण विषयस्य अस्य विवेचनं विद्यते। तथाहि पद्यम् -

प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः।
नैयायिकास्ते परतः सौगताश्चरमं स्वतः॥
प्रथमं परतः प्राहुः प्रामाण्यं वेदवादिनः।
प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम्॥

तत्र सांख्यनये प्रामाण्यम् अप्रामाण्यं च स्वतः एव गृह्यते। नैयायिकमते प्रामाण्यम् अप्रामाण्यं च परतः एव गृह्यते। बौद्धमते प्रामाण्यं परतः गृह्यते। अप्रामाण्यं च स्वतः गृह्यते। मीमांसामते वेदान्तमते च प्रामाण्यं स्वतः गृह्यते। अप्रामाण्यं च परतः गृह्यते।

यथा 'अयं घटः' इति घटविषया प्रमा जायते। तथा 'इयं प्रमा' इति प्रमाविषया प्रमा जायते। यथा घटज्ञानस्य काचित् सामग्री (माध्यमम्) वर्तते तद्वत् प्रमाज्ञानस्यापि काचित् सामग्री वर्तते। प्रमायां प्रमात्वं विद्यते। इदं प्रमात्वमेव प्रामाण्यमिति कथ्यते। यथा प्रमायाः ज्ञानं जायते तथा प्रमात्वस्य अपि ज्ञानं भवति। यथा प्रमाविषयकज्ञानस्य काचित् सामग्री अस्ति एव, तद्वत् प्रमात्वविषयकज्ञानस्य अपि काचित् सामग्री अस्ति एव। येषां मते प्रमाविषयकज्ञानस्य या सामग्री सा एव प्रमात्वविषयकज्ञानस्यापि सामग्री अस्ति ते स्वतस्त्ववादिनः। येषां च मते प्रमाविषयज्ञानस्य या सामग्री ततः भिन्ना एव प्रमात्वविषयकज्ञानस्यापि सामग्री अस्ति। ते परतस्त्ववादिनः। अर्थात् ज्ञानद्वयं भवति। एकस्य ज्ञानस्य विषयः प्रमा, अपरज्ञानस्य विषयः प्रमात्वम्। ज्ञानद्वयस्यापि काचित् सामग्री भवति। यदि द्वयोः ज्ञानयोः

सामग्री समाना तर्हि स्वतस्त्वम्। यदि सामग्री भिन्ना तर्हि परतस्त्वम्। या प्रमा अत्र गृह्यते तन्निष्ठमेव प्रमात्वमपि।

पाठगतप्रश्नाः

१. अनुपलब्धिप्रमाणस्य लक्षणं लिखत।

२. अनुपलब्धेः योग्यत्वस्य किं लक्षणम्।

३. अभावस्य कति भेदाः भवन्ति।

४. प्रागभावस्य लक्षणं लिखत।

५. प्रागभावः कुत्र विद्यते।

६. प्रध्वंसाभावस्य लक्षणं लिखत।

७. प्रध्वंसाभावः कुत्र विद्यते।

८. अत्यन्ताभावस्य लक्षणं लिखत।

९. कः त्रैकालिकाभावः।

१०. अन्योन्याभावस्य स्वरूपं लिखत।

११. अन्योन्याभावभेदाः के।

१२. सोपाधिकान्योन्याभावस्य लक्षणं किम्।

१३. निरुपाधिकान्योन्याभावस्य लक्षणं किम्।

१४. प्रामाण्यपदस्य प्रमाणत्वम् प्रमात्वं वार्थः।

१५. वेदान्तिनः स्वतस्त्वपादिनः परतस्त्ववादिनो वा।

पाठसारः

अस्मिन् पाठे अर्थापत्तिप्रमाणस्य अनुपलब्धिप्रमाणस्य च निरूपणं विद्यते। तत्र अर्थापत्तिशब्दः व्युत्पत्तिभेदेन प्रमावाचकः प्रमाणवाचकश्च वर्तते इति प्रतिपादितम्। उपपाद्यज्ञानम् अर्थापत्तिप्रमाणं भवति। उपपादकज्ञानं च अर्थापत्तिप्रमा भवति। तत्र तदभावव्यापकीभूताभावप्रतियोगित्वम् उपपाद्यत्वम्। एवम् उपपाद्याभावव्याप्यभूताभावप्रतियोगित्वम् उपपादकत्वम्। अर्थापत्तेः द्वौ भेदौ स्तः - श्रुतार्थापत्तिः दृष्टार्थापत्तिश्च। अभिधानानुपपत्तिः अभिहितानुपपत्तिश्च इति द्वौ भेदौ श्रुतार्थापत्तेः स्तः।

तदनन्तरम् अनुपलब्धिप्रमाणस्य विवेचनं विद्यते। तत्र ज्ञानकरणाजन्याभावानुभवासाधारणकारणत्वम् इति अनुपलब्धिप्रमाणस्य लक्षणं विद्यते।

अनुपलब्धिप्रमाणेन च अभावविषयकज्ञानं जायते। अत्र तत्तद्वस्तुज्ञानाभावः करणम्, तत्तद्वस्त्वभावज्ञानं फलमिति सिध्यति। एवञ्च घटादिवस्तुज्ञानाभावः करणं भवति। अर्थात् अनुपलब्धिप्रमाणं भवति। घटादिवस्त्वभावज्ञानं फलं भवति। अर्थात् प्रमा भवति। किन्तु नहि अनुपलब्धिमात्रेण अभावग्रहः भवति किन्तु योग्यानुपलब्धिद्वारैव। धर्माधर्माभावविषयकज्ञानं तु अनुमानप्रमाणेन भवति। तयोः योग्यानुलब्ध्यभावात्। अनुपलब्धिद्वारा यस्य अभावस्य ज्ञानं भवति तच्चतुर्विधं भवति। प्रागभावप्रध्वंसाभावात्यन्ताभावान्योन्याभावभेदात्। तत्र भविष्यतीति प्रतीतिविषयः यः अभावः सः प्रागभावः। नष्टः इति प्रतीतिविषयः अभावः प्रध्वंसाभावः। नास्तीति प्रतीतिविषयः अभावः अत्यन्ताभावः। इदम् इदं नेति प्रतीतिविषयः अभावः अन्योन्याभावः। पाठान्ते च प्रामाण्यवादविषये सामान्यविवरणं विद्यते।

पाठान्तप्रश्नाः -

१. अर्थापत्तिप्रमाणस्य लक्षणं प्रतिपादयन्तु।

२. दृष्टार्थापत्तिलक्षणं लिखन्तु।

३. श्रुतार्थापत्तिस्वरूपं प्रतिपादयत।

४. अभिधानानुपपत्तिलक्षणं लिखत।

५. अभिहितानुपपत्तिस्वरूपं प्रतिपादयत।

६. अनुपलब्धिप्रमाणस्य स्वरूपं लिखत।

७. अभावभेदान् वर्णयत।

८. योग्यानुपलब्धिः का इति प्रतिपादयत।

९. प्रागभावप्रध्वंसाभावयोः स्वरूपं प्रकाशयत।

१०. अत्यन्ताभावान्योन्याभावयोः स्वरूपं प्रकाशयत।

११. प्रामाण्यं प्रतिपादयत।

पाठगतप्रश्नोत्तराणि -

१. अर्थापत्तिप्रमा, अर्थापत्तिप्रमाणमिति द्वौ अर्थौ अर्थापत्तिपदस्य।

२. उपपाद्यज्ञानेनोपपादककल्पनम् अर्थापत्तिप्रमा।

३. अर्थापत्तिप्रमाकरणम् अर्थापत्तिप्रमाणम्।

४. पीनोऽयं देवदत्तः दिवा न भुङ्क्ते इत्युदाहरणे रात्रिभोजनम् उपपादकम्। उपपाद्यं च दिवाऽभुञ्जानिष्ठपीनत्वम्।

५. येन विना यदनुपपन्नम्, तत् तत्रोपपाद्यम्।

६. यस्याभावे यस्यानुपपत्तिस्तत् तत्रोपपादकम्।

७. अर्थापत्तेः द्वौ भेदौ स्तः। दृष्टार्थापत्तिः श्रुतार्थापत्तिः च।

८. श्रुतार्थापत्तेः द्वौ भेदौ स्तः। अभिधानानुपपत्तिः अभिहितानुपपत्तिश्चेति।

९. तरति शोकमात्मवित् इति श्रुतिः।

१०. ज्ञानकरणाजन्याभावानुभवासाधरणकारणम् अनुपलब्धिरूपं प्रमाणम्।

११. तर्कित-प्रतियोगिसत्त्व-प्रसञ्जित-प्रतियोगिकत्वं अनुपलब्धेः योग्यत्वम्।

१२. अभावस्य चत्वारः भेदाः सन्ति। प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावः च।

१३. अनादित्वे सति अभावत्वम् प्रागभावस्य लक्षणम्।

१४. प्रागभावः उपादानकारणे विद्यते।

१५. जन्यविनाश्यभावत्वं प्रध्वंसाभावस्य लक्षणं भवति।

१६. प्रध्वंसाभावः कार्यध्वंसोत्तरम् नष्टकार्यस्य अवयवेषु वर्तते।

१७. त्रैकालिकाभावत्वम् अत्यन्ताभावस्य लक्षणम् अस्ति।

१८. अत्यन्ताभावः।

१९. अन्योन्याभावस्य स्वरूपं लिखत।

२०. अन्योन्याभावः द्विविधः भवति। सोपाधिकः निरुपाधिकश्चेति।

२१. उपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वम्।

२२. उपाधिसत्ताव्याप्यसत्ताकत्वात्यन्ताभाववत्त्वं निरुपाधिकत्वम्।

२३. प्रामाण्यपदस्य प्रमात्वमर्थः।

२४. वेदान्तिनः स्वतस्त्वपादिनः।

॥ इति दशमः पाठः ॥